International Journal of Sanskrit Research 2017; 3(1): 195-196

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 195-196
© 2017 IJSR
www.anantaajournal.com
Received: 23-11-2016
Accepted: 22-12-2016

**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

Correspondence
**जयकान्तसिंहशर्मा**
प्रोफेसर, श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविद्यापीठम्, कटवारिया सराय, नई दिल्ली, भारत

# व्याकरणस्य शब्दसंस्कारकत्वम्

## जयकान्तसिंहशर्मा

### सारांश
इदं न जातु विस्मर्तव्यं यदक्षरसमाम्नायमूलकमिदं न केवलं वेदाङ्गमितरशास्त्रसाधारणं वा, अपितु तत्त्वहितावेदकसंस्कारविशेषत्वात् सर्वविद्यासूपकारकतया परिस्फुरद् विषयतद्रहस्यपौष्कल्यात् किमपि पुण्यतमं महाशास्त्रम् । यत्संस्कारवैधुर्येण किंविधस्यापि जनस्य प्रज्ञा वाचि दुरवस्थां विपर्ययं वा प्रतिपद्यते, तदीयवाक् च विप्रतिपन्नार्था सती स्वसामर्थ्यमुज्झति । युक्तमाह मधुमयभणितीनां मार्गदर्शी महर्षी रामायणे - संस्कारेण यथा हीनां वाचमर्थान्तरङ्गतामिति।[1] व्याकरणसंस्कारवती वाङ् न केवलं मलविक्षेपापनयनेन वाग्योगविदं पुनाति, अपितु ब्रह्मसायुज्ययोग्यतासम्पादनरूपस्य विशेषस्याधानेन विभूषयति च । अमुमेवार्थं कविकुलगुरुरपि ललितसरण्या प्रत्याययति - संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्चेति[2] वाचः शुद्धस्वरूपस्य शब्दात्मनः साक्षात्कारे व्याकरणस्योपकारकत्वमाह स्वयं भर्तृहरिः-

अत्रातीतविपर्यासः केवलामनुपश्यति ।
छन्दस्यश्छन्दसां योनिमात्मा छन्दोमयीं तनुम् ।।[3]

प्रत्यस्तमितभेदाया यद्वाचो रूपमुत्तमम् ।
यस्मिन्नेव तमसि ज्योतिः शुद्धं विवर्तते ॥[4]

**कूटशब्दः** यदक्षरसमाम्नायमूलकवमदं, विषयतद्रिस्यिौष्कल्यात्

## प्रस्तावना
## विवेचनम्
अत्रेदं चिन्त्यम् - सत उत्कर्षाधानं संस्कार इति भूतभाव्युपर्योगिसंस्कारानुगतं लक्षणं तथापि शब्दस्य भूतोपयोगित्वासंभवाद् भाव्युपयोगिलक्षणमत्र विचार्यते । व्याकरणं शब्दस्य संस्कारः, न तु पुरुषस्य, वस्तुसामर्थ्यसचिवकर्मत्वावगमः संस्कार्यत्वे हेतुर्भवति, न केवलं कर्मत्वावगमात् संस्कार्यत्वं भवति, यथा सक्तून् जुहोतीत्यनेन पुरुषस्य सक्तुहोमजन्यादृष्टभाक्त्वात् पुरुषसंस्कारः, तथात्र न । अतः श्रीभाष्यकारो जिज्ञासाधिकरणे संस्कारस्वरूपं परिष्कुर्वन्नाह - संस्कारो हि कार्यान्तरयोग्यताकरणमिति।[5]
यथा काये बुद्धौ च विकारोत्पादका मलाः दोषास्तिष्ठन्ति, तेषां दोषाणां निवृत्तये चिकित्साशास्त्रं कायगतं वातपित्तकफादिरूपं दोषमौषधद्वारा अपहरति । अध्यात्मशास्त्रमन्तः करणे रोगदोषादि कालुष्यं शमदमोपरतितितिक्षावैराग्यादीनामुपदेशेन दूरीकरोति तथैव वाङ्गलानां

भ्रष्टसंस्काराणामसाधूनां शब्दानामसाधुदोषाणां पापसामर्थ्यं साधूनाञ्च पुण्यसामर्थ्यं विज्ञाय साध्वसाधुविवेकज्ञानार्थम् उत्सर्गापवादलक्षणं व्याकरणं परमकारुणिकेन पाणिनिना निबद्धम् । इत्थमपभ्रंशदोषनिवृत्या शब्दसाधुत्वज्ञानं व्याकरणशास्त्रस्य प्रयोजनं फलति यथोक्तम् –

कायवाग्बुद्धिविषया ये मलाः समवस्थिताः।
चिकित्सालक्षणाध्यात्मशास्त्रैस्तेषां विशुद्धयः ।।[6]

वर्णपदवाक्यरूपेण त्रैविध्यं प्राप्ताया वाचः परमः सारस्तु वाचकत्वादभ्युदयहेतुत्वाच्च शब्दसमूहस्तद्रूप एव, यथा निष्पीडितस्येक्षुदण्डस्य सारो रसः, अन्यत्तु ऋजीषम् । यथोक्तम् – ऋजीषमेतद्वाचो यः संस्कारहीनः शब्द इति । किं कर्तृकम् ? किं कर्मकम् ? संस्करणमित्यर्थे यथार्थवधारणाय सिद्धान्तितं भर्तृहरिणा – शब्दस्योर्ध्वमभिव्यक्तेरित्यनेन नित्यत्वेन शब्दस्याभिव्यक्तिवादं पुरस्कृत्य ध्वनेर्व्यञ्जकत्वमुक्तम् । व्यञ्जकत्वं च आवरणभङ्गेन विशेषाधानेन वा संस्कारविशेषेण सिद्धवस्तुनो ज्ञानजनकत्वम् । नित्यः स्फोटरूपः शब्दो बुद्धिगुहायामन्तः सन्निविष्टोऽभिव्यञ्जको ध्वनेरसंसर्गेऽज्ञानावरणेन तिरोहितोऽव्यक्तस्तिष्ठति । स हि ध्वनिसंसर्गेणाज्ञानावरणाभिभवे व्यक्तरूपः श्रवणज्ञानविषयो भवति । एवं स्फोटज्ञानसामाग्रयिकश्च ध्वनिकृतः संस्काररूप उपकारः स्वीकर्तव्यः । स हि संस्कारः किं ज्ञानसाधनेन्द्रियस्य किं वा ज्ञानविषयस्य, किं वा विषयेन्द्रिययोर्द्वयोरपीति ध्वनिविषये वादत्रयं विकल्प्यमुपस्थापितम् ।
शब्दाभिव्यक्तिहेतुभिर्ध्वनिभिः शब्दग्राहकस्य श्रोत्रेन्द्रियस्यैव संस्कारः शब्दग्रहणशक्त्युद्बोधरूपा अतिशयता आधीयते, यतः प्रतिबन्धकदोषेण श्रोत्रसंस्काराभावे बधिरस्य शब्दग्रहणाभावाद् ज्ञायते यत्संस्कृतेन निर्दुष्टेनैव श्रोत्रेन्द्रियेण शब्दो गृह्यत इति । अपरे वदन्ति – श्रोत्रे शब्दग्रहणसामर्थ्यस्य निर्विशेषेण सद् भावेऽपि विषयस्य व्यक्ताव्यक्तत्वाभ्यां ज्ञानस्य जन्माजन्मनोदर्शनाद् ज्ञानविषयस्यान्तरस्य स्फोटस्यैव ध्वनिसंसर्गाद् वर्णपदादिक्रमरूपविशेषाधानरूपोऽतिशय उपाधीयते, यतः स्वस्वरूपोपरागेण संस्कृत एवान्तरः शब्दः श्रावणज्ञानविषयो भवति, नान्यथा । तत्र सिद्धान्तिनो वदन्ति - विषयेन्द्रिययोरुयोरपि संस्कारोऽभ्युपेयः । द्वयोरन्यतरस्यैव संस्कारे विनिगमकाभावाच्छब्दनित्यत्ववादिनां मते योग्यविषयेन्द्रियसन्निकर्षस्य प्रत्यक्षजनकत्वाच्छ्रोत्रेण सन्निकर्षे सति शब्दस्य साक्षात्कारो भवति तद्भावे न जायत इत्यन्वयव्यतिरेकाभ्यां कल्प्यते यद् ध्वनिः स्वोपरागेण शब्दमभिव्यज्य तस्मिन् श्रोत्रे श्रोत्रग्राह्यविषयत्वयोग्यतां सम्पाद्यान्तरं शब्दं विषयमनुगृह्णाति, श्रोत्रदेशं चोपगतो ध्वनिः शब्दग्रहणयोग्यतां सम्पाद्य श्रोत्रेन्द्रियं चानुगृह्णाति । इत्थं ध्वनिनोभयोः संस्कारः क्रियत इति ।
एवं या साध्वसाधुशब्दयोर्ध्वनिस्फोटयोर्वा विवेकेन शुद्धशब्दस्य भावना एव परमात्मानः आत्माभिन्नशब्दब्रह्मणः स्वरूपदर्शनरूपप्राप्तिवर्तत इति वैयाकरणानां सिद्धान्तः । यः शब्दब्रह्मणः प्रवृत्तितत्त्वज्ञो ध्वन्युपाधिकवर्णपदादिक्रमविभागोपग्रहस्य मिथ्यात्वज्ञानवान् भवति स एव शब्दतत्त्वज्ञः, स ब्रह्मस्वरूपं लभते । अर्थाद् व्याकरणेन शब्दस्यासाधुत्वविविक्तसाधु स्वरूपान्वाख्यानरूपे संस्कारे सत्येव साधुशब्दस्य ज्ञानपूर्वकप्रयोगेण विशुद्धान्तः करणो वैयाकरणः शब्दभावनाभ्यासेन वर्णपदादिविवर्तविकारभेदस्य मिथ्यात्वनिश्चयवान् तदितिरिक्ताखण्डशुद्धशब्दब्रह्मरूपाधिष्टानतत्त्वस्य साक्षात्कारेण समुच्छिन्नभेदवासनाग्रन्थिः शब्दब्रह्मणा सायुज्याख्यं मोक्षमधिगच्छति । यथोक्तमृचा –

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि ।।[7]

यथा तितउना चालिन्या तुषापाकरणेन सक्तोः संस्कारो भवति तथैव व्याकरणाध्ययनसंस्कृतमनसा शब्दस्यापभ्रंशरूपतुषापाकरणेन शब्दसाधुस्वरूपनिर्वचनरूपः संस्कारो, नीरक्षीरन्यायेन ध्वनिरूपासंकीर्णशुद्धस्फोटस्वरूपविवेकरूपो वा संस्कारो भवति, तेन शुद्धान्तःकरणा वैयाकरणाः शब्दब्रह्मणि आत्मैकत्वभावनया सायुज्यं गच्छन्ति । अतः शब्दसंस्कारस्य व्याकरणस्य मोक्षसाधनता सिद्धा भवति ।

## सन्दर्भ


1. वाल्मीकीयरामायणम् 5-15-39
2. कुमारसम्भवम् 1-28
3. वाक्यपदीयम् 1-17
4. वाक्यपदीयम् 1-18
5. ब्रह्मसूत्रे श्रीभाष्ये जिज्ञासाधिकरणम्
6. वाक्यपदीयम् 1-146
7. ऋग्वेदः 10-71-2